


# ९ ऋतुः वसन्तः

भारतवर्ष ऋतुओं की रमणीयता एवं वैविध्य का अनुपम भंडार है। यहाँ वर्ष को छः ऋतुओं—वसन्त, ग्रीष्म, वर्षा, शरद, हेमंत तथा शिशिर में विभाजित किया गया है। इनमें वसंत ऋतु अपनी अनुपम छटा, नवजीवन-सञ्चारिणी शक्ति तथा सर्वत्र व्याप्त उल्लास के कारण 'ऋतुराज' के रूप में प्रतिष्ठित है।


प्रस्तुत पाठ में वसंत के आगमन से प्रकृति में व्याप्त होने वाले नवसौन्दर्य, पुष्पों की सुरभि, पक्षियों के मधुर कलरव तथा समस्त चराचर जगत में उमंग भरने वाले हर्ष और चेतना का अत्यंत सजीव एवं भावपूर्ण चित्रण किया गया है। वसंत के आगमन से प्रकृति के अद्भुत सौन्दर्य एवं परिवर्तनों को इस पाठ के माध्यम से जानेगें।

India is a land blessed with an extraordinary richness and diversity of seasons. Traditionally, the year is divided into six seasons—Spring (Vasant), Summer, Monsoon, Autumn, Pre-winter and Winter. Among them, Spring holds a place of special honor and is revered as the "King of Seasons" because of its enchanting beauty, life-renewing energy, and the joy it spreads throughout nature. The present lesson vividly and eloquently portrays the arrival of Spring and the transformation it brings to the natural world. With its advent, nature adorns itself with fresh

© NCERT not to be republished

splendor; flowers bloom and fill the air with their sweet fragrance, birds welcome the season with melodious songs, and an atmosphere of delight and vitality pervades all creation. Spring awakens new hopes, fresh enthusiasm and a sense of renewal in every living being.

Through this lesson, we shall explore the remarkable beauty of nature and the delightful changes that accompany the arrival of Spring.



स्वागतं ते ऋतुराज ! त्वमेव कुसुमाकरः। तवागमने भवति पुष्पाणां विकासः, सौरभाणां च प्रसारः। अतः तव आगमनं सर्वान् जनान् आनन्दयति, निखिलान् प्राणिनः प्रीणयति, चराचरं च रमयति। इदानीं जडता विलीयते, मलिनता अपगता भवति, स्वच्छता एव दृश्यते परितः।

पश्यतु मनाक् निर्मलम् आकाशम्। स्वच्छाः दिशः प्रसन्ना इव भान्ति अद्य। सर्वत्र तडागेषु नदीषु कुल्यासु सरसु च राजते विमलं वारि। क्वचित् मुकुलितानि अपरत्र प्रफुल्लितानि कमलवनानि। विकसितानां पङ्कजानां शोभा कस्य मनो न हरति !



वनेषु, वाटिकासु, उद्यानेषु च नानावर्णानि पुष्पाणि शोभन्ते। पुष्पाणामुपरि गुञ्जन्ति भ्रमराः। ते च प्रियाभिः सह सानन्दं मधूनि पिबन्ति, मधुना मत्तः पिको मधुरं कूजति, तदीयं ध्वनिं बालकाः अनुकुर्वन्ति। वृक्षेषु नवपल्लवाः विराजन्ते। आम्रेषु मञ्जर्यः संलग्नाः। कुसुमितं सहकारमाश्रित्य लता प्रमुदिता। रसाले सङ्गता लता लोकानां मनांसि हरति। पक्षिणां कलकूजनमपि सर्वेषां सुखदं भवति।

अद्यत्वे मधुनः आधिक्यम्; पुष्पेषु मधूनि भवन्ति, मञ्जरीषु च भवन्ति, मधूनि, मधुने लोलुपाः चञ्चरीकाः यदा प्रमादं कुर्वन्ति तदा तेषां पक्षाः संसक्ता भवन्ति, मधुना संश्लिष्टतया ते कदाचित् उड्डयितुं न पारयन्ति। तथापि मधुनि तादृशः स्वादः भवति येन ते ततो न विरमन्ति, अपि तु अनवरतं तत्र स्वानुरागं प्रकटयन्ति।

सर्षपः पीतं वसनं दधानः प्रकटयति वासन्तिकं विलासम्। पुष्पेभ्यः सौरभं, वारिभ्यः शीतलतां चादाय प्रवाति मन्दः पवनः। पवनेन आन्दोलिता मन्दं मन्दं कम्पमाना लता नर्तकीव नृत्यन्ती प्रतीयते।

अस्मिन् समये प्रमुदिताः सर्वे जनाः समूहं रचयित्वा प्रकृतिशोभां पश्यन्तः भ्रमन्ति। उद्यानेषु, वाटिकासु, नदीतटेषु च क्वचित् गायन्ति लोकाः। अपरत्र नृत्यन्ति कूर्दन्ति च बालकाः। न केवलं मानवाः एव अपि तु पशवः पक्षिणः चापि प्रमुदिताः भवन्ति वसन्ते।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थ | हिन्दी | English | मातृभाषायाम् अर्थं लिखत |
|---|---|---|---|---|
| कुसुमाकरः | वसन्तः ऋतुः | फूलों का भण्डार, वसन्त ऋतु | a wealth of flowers | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| प्रीणयति | आनन्दयति | प्रसन्न करता है | brings joy | |
| जडता | शैत्यम् | सर्दी | cold season | |
| विलीयते | विलीनं भवति | मिट गई है | has disappeared | |
| परितः | सर्वत्र | चारों ओर | all around | |
| मनाक् | किञ्चित् एव | थोड़ा | slightly | |
| कुल्यासु | लघुनदीषु | नहरों में | in the canals | |
| मुकुलितानि | प्रस्फुटितानि | खिले हुए | bloomed | |
| पिकः | कोकिलः | कोयल | cuckoo | |
| चञ्चरीकाः | भ्रमराः | भौंरे | bees | |
| प्रमादम् | असावधानताम् | असावधानी | carelessness | |
| पक्षाः | पिच्छानि | पंख | wings | |
| संश्लिष्टतया | संयुक्तया | चिपक जाने से | due to sticking | |
| वसनम् | वस्त्रम् | वस्त्र | clothes | |
| आन्दोलिता | कम्पिता | हिलती हुई | moving | |
| पश्यन्तः | ईक्षमाणाः | देखते हुए | seeing | |
| आश्रित्य | अवलम्ब्य | सहारा लेकर | by taking support | |
| प्रमुदिताः | अतीव प्रसन्नाः | अत्यन्त प्रसन्न | extremely happy | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| सानन्दम् | सहर्षम् | आनन्द सहित | joyfully | |
| प्रवाति | वहति | बहती है | flows | |
| क्वचित् | कस्मिंश्चित् स्थाने | कहीं पर | somewhere | |

## अत्र इदम् अवधेयम्

### अव्ययपदम्

संस्कृतभाषायां कानिचन अपरिवर्तनीयानि पदानि भवन्ति येषां कस्यामपि विभक्तौ, वचने लिङ्गे वा किमपि परिवर्तनं न भवति। एतादृशानि पदानि अव्ययानि कथ्यन्ते। अव्ययस्य परिभाषारूपेण श्लोकमिदं द्रष्टुं शक्यते—

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

### अत्र पाठे प्रयुक्तानां प्रमुखानाम् अव्ययपदानाम् अर्थाः प्रदत्ताः सन्ति

अद्य – आज

इदानीम् – अब

क्वचित् – कहीं

अपरत्र – अन्यत्र

सह – साथ

च – और

एव – ही

अपि – भी

तथापि – फिर भी

यदा-तदा – जब–तब

इव – जैसे

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत—**

क. वसन्तस्य पर्यायवाचकः शब्दः कः?

ख. वसन्ते आकाशः कीदृशो भवति?

ग. वसन्ते कः मधुरं कूजति?

घ. पिकस्य ध्वनिं के अनुकुर्वन्ति?

ङ. कम्पमाना लता कीदृशी प्रतीयते?

**२. पट्टिकातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत—**

**सर्वत्र, तदा, इदानीं, क्वचित्, एव, अद्यत्वे**

**यथा—** स्वच्छता एव दृश्यते परितः।

क. ..................... जडता विलीयते, मलीनता अपगता भवति।

ख. ..................... तडागेषु नदीषु कुल्यासु सरःसु च राजते विमलं वारि।

ग. ..................... मधुनः आधिक्यम्; पुष्पेषु मधूनि भवन्ति।

घ. ..................... मुकुलितानि अपरत्र प्रफुल्लितानि कमलवनानि।

ङ. यदा प्रमादं कुर्वन्ति ..................... तेषां पक्षाः संसक्ता भवन्ति।

**३. अधोलिखितेषु वाक्येषु सत्यम्/असत्यं चिह्नितं कुरुत—**

**यथा—** मन्दः पवनः पुष्पेभ्यः सौरभम् आदाय प्रवाति। (सत्यम् ✓ / असत्यम्)

क. वसन्तः ऋतुराजः इति कथ्यते। (सत्यम्/असत्यम्)

ख. वसन्तसमये आकाशः मलिनः दृश्यते। (सत्यम्/असत्यम्)

ग. वनेषु वाटिकासु च नानावर्णानि पुष्पाणि शोभन्ते। (सत्यम्/असत्यम्)

घ. केवलं मानवाः एव वसन्ते प्रमुदिताः भवन्ति। (सत्यम्/असत्यम्)

ङ. विकसितानां पङ्कजानां शोभा कस्यापि मनः न हरति। (सत्यम्/असत्यम्)

© NCERT not to be republished

## ४. अधोलिखितेषु शब्देषु सन्धिं सन्धिविच्छेदं च कुरुत—

**यथा—** = च + अपि चापि।

क. सु+ आगतम् = .........................................।

ख. तव + आगमने = .........................................।

ग. नर्तकी + इव = .........................................।

घ. पुष्पाणामुपरि = .................. + ..................।

ङ. स्वानुरागम् = .................. + ..................।

## क्रियाकलापः

### लिखितःक्रियाकलापः

१. षड् ऋतुषु 'मम प्रियः ऋतुः' इति विषयम् अधिकृत्य सुन्दरं चित्रं निर्माय, तस्य चित्रस्य आधारेण संस्कृतभाषायां पञ्च वाक्यानि लिखत ।"

### मौखिकः क्रियाकलापः

१. वसन्त-ऋतुः 'ऋतुराजः' इति किमर्थम् उच्यते? स्वविचारान् मातृभाषायां प्रकटयत ।"

२. यदि वसन्तः ऋतुः न आगच्छेत् तर्हि प्रकृतिः, पर्यावरणं, मानवजीवनं च कथं भवेत्? सर्वे छात्राः एकैकं वाक्यं वदन्तु ।

© NCERT not to be republished